# न्यायदर्शनदिशा ईश्वरस्वरूपविमर्शः

भवानीप्रसादमिश्रः[1]


## सारसंक्षेप

दर्शनक्षेत्रे नैकमतमीश्वरविषये । भूतवादिनश्चार्वाकाः बौद्धाश्च दर्शनेतरैः स्वीकृतमीश्वरं नाङ्गीकुर्वन्ति । जैनाश्च प्रमाणत्वेनेश्वरमस्वीकुर्वन्ति । अन्यानि चास्तिकानि दर्शनान्यपि ईश्वरस्वरूपादिविषयं स्वानुकूलतया प्रतिपादयन्ति । परन्तु न्यायदर्शनेन जगद्रूप-महत्कार्यस्य कारणरूपेण स्वीकृतो वर्तत ईश्वरः । 'तेन विना तृणाग्रमपि न चलति' इत्यनुसारेण जगत्सृष्ट्यादिकार्यं सर्वमपि ईश्वरः सम्पादयतीति शास्त्राणि उद्घोषयन्ति, न्यायदर्शनं च । न्यायदर्शनेन महता प्रयत्नेन विप्रतिपत्तयो निरस्य ईश्वरस्यास्तित्वं दृढीकृतम् । सोऽयमीश्वरः निमित्तकारणमेवेति वदन्ति नैयायिकाः । तत्र निमित्तकारणत्वमङ्गीकृतस्य तस्य स्वरूप-सामर्थ्य-ज्ञानादिविषयाः ज्ञातव्या भवन्ति । ईश्वरसम्बद्धविषयस्य गाम्भीर्यं विशदव्याख्यामपेक्षते, तथाऽपि प्रस्तुतनिबन्धे विषयेऽस्मिन् संक्षिप्ततया अध्ययनं विधीयते ।)


*शब्दकुञ्जिका* : दर्शनम्, न्यायः, ईश्वरः, जगत्कारणम्, निराकारत्वम्, सगुणत्वम्, कार्यत्वम् ।

## १. विषयपरिचयः

**दुःखालयमशाश्वतम्**[२] इति गीतोक्तवचनानुसारेण जन्म-मरणरूपसंसारः दुःखमयोऽनित्यश्च वर्तते । अन्यानि सर्वाणि शास्त्राणि दर्शनानि च संसारस्य दुःखमयत्वमेव प्रतिपादयन्ति । संसारदशायामनुभूयमानं सुखं तु न वस्तुतः सुखम्, परन्तु सुखाभास एवेति तेषां मतम् । तच्च सुखं ग्रीष्मर्तौ प्रचण्डघर्मेण प्रतप्तस्य पथिकस्य क्षणं यावत् वृक्षच्छायायां तिष्ठन् अनुभूतं शैत्यमिव प्रतिभातीति । दुःखं चाध्यात्मिकमाधिदैविकमाधिभौतिकभेदेन त्रिधा वर्तते, दुःखसाधनेषु चोपचारात् दुःखमिति व्यवहारो जायते । इत्थं दुःखालये निमग्नाः संसारिणः **'अहं कदा सुखं प्राप्नुयाम्'** इति विचिन्त्य तन्निवर्तयितुं यतमाना भवन्ति, परं स्वस्वरूपज्ञानाभावात् तदशक्तानां तेषां निरवच्छिन्नतया गमनागमनं प्रचलति, परन्तु येऽपि तत्त्वज्ञानिनो भवन्ति, ते संसारदशायामेव निवृत्तरागा भवन्ति, **यद्गत्वा न निवर्तन्ते**[३] इत्यनुसारेण पुनर्निवृत्यभाववन्तश्च भवन्तीति सकलदर्शनमतम् ।

सर्वोऽपि लोकः **अहं सदा सुखी स्याम्** इत्येवं विचिन्त्य आत्यन्तिकं निरतिशयञ्च सुखं वाञ्छति । तच्च सुखं दुःखनिवृत्तिमात्रम् अथवा तदतिरिक्तानन्दविशेष इत्यत्रास्ति विदुषां विप्रतिपत्तिः, तथापि **दुःखनिवृत्तिमन्तरा आनन्दविशेषानुभवो नभवती**त्यत्र नास्ति केषामपि वैमत्यम् । इत्थं लोकस्य दुःखमयत्वं ज्ञात्वा ततः जीवानां कथं निवृत्तिर्भवेदिति चिन्त्यमानानां परमकारुणिकानां ऋषिमहर्षीणां मनसि जिज्ञासाबहुत्वं जातम्, तच्चोक्तमुपनिषदि-

**किं कारणं ब्रह्म कुतः स्म जाता जीवाम केन क्व च सम्प्रतिष्ठा ।**

---

[१] उपप्राध्यापकः, न्यायः, ने.सं.वि., पिण्डेश्वरविद्यापीठम्, धराननगरम् E-mail: *bpshreeniwas@gmail.com*

[२] श्रीमद्भगवद्गीता ८/१५

[३] तत्रैव १५/६

**अधिष्ठिता केन सुखेतरेषु वर्तामहे ब्रह्मविदो व्यवस्थाम् ॥**[४] अत एव विविधानां दर्शनानामुत्पत्तिर्जाता । तेषां सर्वेषामपि दर्शनानां दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानाम् उत्तरोत्तरनिवृत्तिपूर्वकं मोक्षप्राप्तिरेव लक्ष्यम् ।

इत्थं विचिन्त्य एव दुःखपङ्कनिमग्नानुद्दिधीर्षुः परमकारुणिको गौतममुनिः अष्टादशविद्यास्थानेषु अभ्यर्हिततमामान्वीक्षिकीं निरमिमीत । भाष्यकारेण वात्स्यायनेन **प्रत्यक्षागमाभ्या-मीक्षितस्याऽन्वीक्षणमन्वीक्षा, तया प्रवर्त्तत इत्यान्वीक्षिकी=न्यायविद्या=न्यायशास्त्रम्**[५] इत्युक्तम् । अत्रान्वीक्षिकीति पदं न्यायशास्त्रपरकं वर्तते । सूत्रकारेण महर्षिणा गौतमेन न्यायदर्शनस्य प्रथमे सूत्रे षोडष पदार्थाः निर्दिष्टा वर्तन्ते । तेषां तत्त्वज्ञानेन दुःखात्यन्तिकनिवृत्तिरूपमोक्षस्याप्तिर्भवतीति तत्रैवाभिहितमनेन । तत्रान्यतमः पदार्थः प्रमेयमस्ति । प्रमेयाणि च द्वादश परिगणितानि वर्तन्ते । तानि च यथा न्यायसूत्रे-
**आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गस्तु प्रमेय**[६] मिति । तेषु चादिमं प्रमेयम् आत्मा वर्तते । सोऽयमात्मा जीवात्मपरमात्मभेदेन द्विविधः । जीवात्मा अनेको वर्तते प्रत्येकेषु शरीरेषु वर्तमानत्वात् । शरीराणां च प्रत्यक्षत एव भिन्नत्वात् अनन्तत्वाच्च । अतस्तत्तच्छरीरावच्छिन्नात्मानोऽप्यनन्ताः । तेषु प्रमेयेषु ईश्वर एव प्रधानम् सर्वजीवानां नियन्तृत्वात् प्रेरकत्वात् कर्मफलप्रदातृत्वाच्च । ईश्वरतत्त्वमज्ञात्वा केवलमन्येषामेव तत्त्वानां ज्ञानेन मोक्षप्राप्तिर्न सम्भवति, तस्य प्रधानप्रमेयत्वात् जीवानामनुग्राहकत्वाच्च । तस्य साक्षात्कारः मननपूर्वकमिति **आत्मा वाऽरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्याषितव्यः**[७] इत्यादिप्रकारेणोपनिषत्सु अनेकशः प्रतिपादितं वर्तते । तस्यातिशयितमन्तव्यत्वं दर्शयन्नेव उदयनाचार्यश्च कथयति-

**न्यायचर्चेयमीशस्य मननव्यपदेशभाक् ।**

**उपासनैव क्रियते श्रवणानन्तरागता**[८] इति ।

नैयायिकैः जगद्रूपकार्यस्य निमित्तकारणरूपेण स्वीकृतः परमात्मा कीदृशो वर्तते, तस्य स्वरूपं किमित्यादिविषयेऽत्र संक्षिप्ततया चर्चा विधीयते ।

## २.समस्याकथनम्

ईश्वरः प्राचीनकालादेव शास्त्रीयरूपेण व्यावहारिकरूपेण च विप्रतिपत्तेः विषयः । यथा- अस्ति न वा ? कीदृश अस्ति ? किं करोति ? इत्यादिरूपं चिन्तनं बहुश उद्भावितं दृश्यते । अतः सम्यक्तया ईश्वरः कथं ज्ञायते ? ईश्वरस्य समग्रस्वरूपज्ञानं कथं भवतीति मुख्या समस्या वर्तते ।

## ३. उद्देश्यम्

ईश्वरस्वरूपमज्ञात्वैव तस्य जगत्कारणत्वम् अज्ञातं भवति । अतः तस्य स्वरूपनिर्वचनमध्ययनस्यास्योद्देश्यं विद्यते ।

---

[४] श्वेताश्वतरोपनिषद्–१/१ ।

[५] वात्स्यायनः,न्यायभाष्यम्–१/१/१ ।

[६] गौतमः, न्यायदर्शनम्–१/१/९ ।

[७] बृहदारण्यकोपनिषद्–२/४/५ ।

[८] आचार्यः, उदयनः, न्यायकुसुमाञ्जलिकारिका–१/३ ।

**४. अध्ययनविधिः**

प्रस्तुताध्ययने पुस्तकालयस्योपयोगो विहितः । तत्र प्राथमिकसामग्रीरूपेण ईश्वरसम्बद्धाः मूलग्रन्थाः स्वीकृता वर्तन्ते । द्वितीयकसामग्रीषु च तत्सम्बद्धानां टीकोपटीकायुक्तानां ग्रन्थानां सहयोगेन व्याख्याविश्लेषणं विहितमस्ति ।

**५. सीमाङ्कनम्**

न्यायदर्शनदृष्टचा जगतो निमित्तकारणत्वेन स्वीकृतस्येश्वरस्य सरलतया स्वरूपनिर्वचनमेवास्याध्ययनस्य सीमाङ्कनं विद्यते ।

**६. विषयविवेचनम्**

**६.१. ईश्वरोऽस्ति न वा ?**

दर्शनक्षेत्रे सुविविदितोऽयं ईश्वरविषयः । बौद्धादयो नास्तिकास्तु नैयायिकादिभिः स्वीकृतस्य परमात्मनोऽस्तित्वमेव न स्वीकुर्वन्तीत्येव न, अपितु विविधैः कुतर्कैः खण्डयन्ति च । अन्ये विविधैः प्रमाणैः परमात्मानं साधयन्ति । पूर्वपक्षिभिः चार्वाकबौद्धजैनादिभिः निषेधकरणादत्र ईश्वरसाधनस्यावश्कता जाता । तद्यथा-न्यायकुसुमाञ्जलिकारेणोदयनाचार्येणेश्वरसाधनात्प्राक् पञ्च विप्रतिपत्तय उपस्थापिताः । **अलौकिकस्य परलोकसाधनस्याभावात्, अन्यथापि परलोकसाधनानुष्ठानसम्भवात्, तदभावावेदकप्रमाण-सद्भावात्, सत्त्वेऽपि तस्याप्रमाणत्वात्, तत्साधकप्रमाणाभावाच्चे**[९] ति क्रमशः चार्वाक-मीमांसक-बौद्ध-जैन-सांख्यानां मतं प्रस्तूय प्रत्येकस्तबके तान् सर्वानपि खण्डयन् पञ्चमे स्तबके स महता प्रयत्नेन ईश्वरं प्रतिष्ठापयति ।

ईश्वरो न प्रत्यक्षप्रमाणस्य विषयः । प्रत्यक्षतयाऽनुभवितुं तत्करणानामिन्द्रियाणां तेन सह संनिकर्ष आवश्यकः । अरूपिद्रव्यत्वात् सन्निकर्षाभावेन न बाह्यप्रत्यक्षम् । बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षे चोद्भूतरूपस्य कारणत्वात्, ईश्वरे च रूपाभावात् । नापि मानसं प्रत्यक्षम्, स्वात्मभिन्नद्रव्यत्वात्, ज्ञानादिभिन्नत्वाच्च । परात्मनः परेण मनसाऽग्राह्यत्वात्, स्वमनसा स्वप्रत्यक्षं प्रति परात्मव्यावृत्तविजातीयमनःसंयोगस्यैव कारणत्वात् । नाऽप्यनुमानं प्रमाणम्, ईश्वरस्याप्रत्यक्षतया तस्य केनचिल्लिङ्गेन सहचारदर्शनाभावेन व्याप्तिग्रहस्यासम्भवात् । व्याप्तिग्रहं विना अनुमितिज्ञानस्यानुत्पन्नत्वात् । न चोपमानं प्रमाणमीश्वरविषये प्रभवति, ईश्वरतुल्यस्य कस्यचिदभावेन सादृश्यज्ञानाभावात् । नापि शब्दः प्रमाणम्, **सम्बाहुभ्यान्धमतिसम्पतत्रैर्द्यावाभूमी जनयन् देव एकः**[१०] इत्यादिश्रुतीनामीश्वरोच्चरितत्वेन प्रामाण्याद् ईश्वरस्यैव संशयितत्वेन ईश्वरोक्ततया तासां श्रुतीनां प्रामाण्ये संशयात् । एवं प्रत्यक्षानुमानोपमानशब्दप्रमाणागोचरत्वादीश्वरः खपुष्पवदलीक इति पूर्वपक्षिणां मतं खण्डयन् नैयायिकः कथयति-

न, अनुमानप्रमाणस्य सद्भावात्, अर्थात् अनुमानप्रमाणेनेश्वरस्य सिद्धिर्भवति । विशेषत ईश्वरं साधयितुमेव प्रणीतस्योदयनाचार्यस्य न्यायकुसुमाञ्जलिग्रन्थे बहवो हेतव उपस्थापिताः । तत्र तेन चार्वाकमीमांसकबौद्धजैनसांख्यैः क्रमशः प्रस्तुतानां विप्रतिपत्तीनां क्रमशः पञ्च स्तवकेषु खण्डनपूर्वकं पञ्चमस्तवके युक्तिपूर्वकमीश्वरस्य सिद्धिर्विहिता । उक्तञ्च कारिकायाम्-

**कार्यायोजनधृत्यादेः पदात् प्रत्ययतः श्रुतेः ।**
**वाक्यात् संख्याविशेषाच्च साध्यो विश्वविदव्ययः ॥**[११]

---

[९] आचार्योदयनः, न्यायकुसुमाञ्जलि, पृष्ठ सं. २५

[१०] शूक्लयजूर्वेदः १७/१९

[११] न्यायकुसुमाञ्जलिः - ५/१

नैयायिका ईश्वरं जगतः निमित्तकारणत्वेनाङ्गीकुर्वन्ति, सः च कर्तृरूपेणात्र निर्दिष्टः । **क्षित्यङ्कुरादिकं कर्तृजन्यं कार्यत्वात्, घटवत्** इत्यनुमानम् । अत्र क्षित्यङ्कुरादिकं पक्षः, कर्तृजन्यत्वं साध्यम्, कार्यत्वं हेतुः, घटः दृष्टान्तः । यत्र-यत्र कार्यत्वं तत्र-तत्र कर्तृजन्यत्वमिति कार्यत्वहेतुः कर्तृजन्यत्वस्य नियतसहचारी वर्तते । नियतसाहचर्यमेव व्याप्तिरिति नियमात् कार्यत्वहेतुः कर्तृजन्यत्वसाध्यस्य व्याप्यो वर्तते । संसारे यदपि कार्यं दृश्यते, तस्य कर्ताऽपि भवत्येव, यथा- घटादिकार्यं कुलालादिकर्त्रा जन्यमिति प्रत्यक्षमनुभूयते । कर्तृत्वं पुनः स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वमिति । संसारश्च महत्कार्यं वर्तते, अतः अस्मदादिषु क्षुद्रप्राणिषु तत्कर्तृत्वस्यासम्भवात्, कश्चन समर्थः कर्ता कल्पनीयो भवति, सैव च ईश्वर इति । क्षित्यङ्कुरादिकम् अकर्तृकं शरीराजन्यत्वात् आकाशवदिति नास्तिकानुमानेन सत्प्रतिपक्षदोषोऽपि नास्त्यत्र, शरीराजन्यत्वमस्तु अकर्तृकत्वं मास्तु इत्यत्र व्यभिचारशङ्कानिवर्तकानुकूलतर्काभावेन कार्यकारणाभावस्यासंभवात् ।

इत्थमन्ये आयोजनादिहेतवश्चेश्वरसिद्धौ प्रयुक्ता वर्तन्ते । एवमीश्वरसिद्धौ तदुच्चरितत्वेन वेदस्य प्रामाण्यनिश्चयात् वेदोऽपीश्वरविषये प्रमाणमस्ति । एवञ्च **विश्वतश्चक्षुरुत विश्वतोमुखो विश्वतो बाहुरुत विश्वतस्पात् । संबाहुभ्यां धमति सम्पतत्रैर्द्यावाभूमी जनयन् देव एकः**[१२] इत्यादय आगमा अपि प्रमाणत्वेनानुसन्धेयाः ।

### ६.२. ईश्वरस्यैकत्वम्

ब्रह्मादिदेवानां बहुत्वं शास्त्रेषु बहुषः प्रतिपादितं वर्तते, परन्तु ईश्वरस्य नानात्वे न कुत्रापि किमपि उल्लिखितमस्ति, ईश्वरसदृशोऽन्यस्याभावात् । येन प्रमाणेन ईश्वरस्य सिद्धिर्भवति, तेनैव प्रमाणेन तस्यैकत्वमपि सिद्ध्यति । **तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय**[१३] इत्यादिवेदवचनेषु ईश्वरविषय एकवचनस्य प्रयोगादपि वेदेषु चेश्वरस्यैकत्वं प्रतिपादितमिति मन्तव्यं भवति । न्यायसूत्रकारेण ईश्वरकारणविषयक एकस्मिन् सूत्रे ईश्वरं प्रति एकवचनस्य प्रयोगात्, अन्यस्थले कुत्रापि वचनबहुत्वाभावाच्च ईश्वरस्यैकत्वमस्तीति सिद्ध्यति । एवं योगसूत्रस्य व्याख्यायां व्यासमहर्षिणा तस्याप्रतिमैश्वर्यस्याप्रतिहतैश्वर्यस्य चैकत्वमेवोक्तम् यत्- **तच्चैतस्यैश्वर्यं साम्यातिशयविनिर्मुक्तम् । न तावदैश्वर्यान्तरेण तदतिशय्यते । यदेवातिशायि स्यात्तदेव तत्स्यात् । तस्माद्यस्य काष्ठाप्राप्तिरैश्वर्यस्य स ईश्वरः । न च तत्समानमैश्वर्यमस्ति । कस्मात् ? द्वयोस्तुल्ययोरेकस्मिन् युगपत्कामितेऽर्थे नवमिदमस्तु पुराणमिदमस्तु इत्येकस्य सिद्धावितरस्य प्राकाम्यविघातादूनत्वं प्रसक्तम् । द्वयोश्च तुल्ययोर्युगपत्कामितार्थप्राप्तिर्नास्ति, अर्थस्य विरुद्धत्वात् । तस्माद्यस्य साम्यातिशयैर्विनिर्मुक्तमैश्वर्यं स एवेश्वरः**[१४] इति । तर्कसंग्रहकारेण आत्मविभाजनक्रमे ईश्वरस्यापि चर्चा विहिता । तेनोक्तम् **तत्रेश्वरस्सर्वज्ञः परमात्मा एक एव**[१५] इति । अत्रात्मपदं परमात्मन्यपि प्रयोगात् जीवपरमात्मसाधारणम् । श्रुतिवाक्येष्वपि तस्यैकत्वं प्रतिपादितं दृश्यते । यथा- **सोऽकामयत एकोऽहं बहु स्याम प्रजायेय** इति । भगवतो श्रीकृष्णस्य विराटस्वरूपस्य अवलोकनानन्तरं भगवत्समानः कोऽपि नास्ति, तदधिकस्य तु सर्वथा अभाव एव वर्तते इति विचारयन् प्रार्थयते पार्थः- **न तत्समोऽस्त्यभ्यधिकः कुतोऽन्यः**[१६], इति ।

---

[१२] ऋग्वेदसंहिता-८/३/१६

[१३] शुक्लयजुर्वेदसंहिता ३१/१८

[१४] श्रीवास्तव, सुरेशचन्द्र, पातञ्जलयोगदर्शनम्, व्यासभाष्य-हिन्दीव्याख्योपेतम्- पृष्ठसं. ८०

[१५] अन्नं भट्टः, तर्कसंग्रहः, पृष्ठसं. ७०

[१६] श्रीमद्भगवद्गीता-११/४३

न्यायवार्तिककारः उद्योतकराचार्यः स्वग्रन्थे ईश्वरस्य नानात्वं निषिध्यैकत्वं प्रतिपादयति । तत्रोक्तम्- **ईश्वरस्यानेकत्वे किं बाध्यत इति ? एकस्मिन् वस्तूनि व्याहतयोरीश्वरयोः प्रवृत्तिर्न प्राप्नोति । अथैकमितरः अतिशेते ? योऽतिशेते स ईश्वरः नेतरः इति ।**[१७]

## ६.३. ईश्वरस्य सर्वज्ञत्वम्

ईश्वरो यतः जगत्कर्ता तत एव सर्वज्ञो वर्तते । कर्तृत्वञ्च स्वोपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वमिति । यथा घटकार्ये उपादानम्=समयायिकारणं कपालद्वयम्, तद्गोचराऽपरोक्षम्=तद्विषयकप्रत्यक्षम्, ज्ञानचिकीर्षाकृतिवान् कुलालो भवति । एवं जगद्रूपकार्यस्य उपादानम् परमाणुः, तद्गोचरापरोक्षज्ञानचिकीर्षाकृतिमत्वादीश्वरः कर्ता, अत एव तस्य सर्वज्ञत्वं च सम्पद्यते । **यः सर्वज्ञः स सर्ववित्** इत्यादिश्रुति च तत्र प्रमाणम् । सर्वेषां जीवानामदृष्टं ज्ञात्वा तदनु एव लोकसृष्टिः तस्य सर्वज्ञत्वं विना न सम्भवति । पामरजीवानां बुद्धिपरिधौ न स समागच्छति । **न तत्समश्चाभ्यधिकश्च विद्यते**[१८] इत्याद्युपनिषद्वचनेष्वपीश्वरस्य सर्वज्ञत्वमेव प्रतिपादितम् ।

न्यायवार्तिककारस्य भारद्वाजोद्योतकरस्य मते ईश्वरो यदि सर्वज्ञो न स्यात्, तदासौ जगतः स्रष्टाऽपि न स्यादिति । उक्तं च तत्र- **न च बुद्धिमत्तया विना ईश्वरस्य जगदुत्पादो घटते**[१९] इति । वाचस्पतिमिश्रमते ईश्वरः कार्योपादानकारणाभिज्ञः सन्नेव कार्यस्य कर्ता भवति । अतः जगत्कर्ता ईश्वरो जगद्रूपकार्यस्य उपादानकारणाभिज्ञ एव वर्तते । अत्राभिज्ञशब्देन प्रत्यक्षज्ञानं संगृहितम् । जगत उपादानकारणं परमाणुरिति ईश्वरोऽदृश्यपरमाणोः प्रत्यक्षज्ञानवान् । संसारे सर्वे दृश्यपदार्था इन्द्रियैर्ज्ञाता भवन्ति, किन्तु अदृश्यपदार्थ इन्द्रियगोचरो न भवति, अत इन्द्रियनिरपेक्षतया अदृश्यपदार्थदर्शने यः समर्थः, स एव सकलपदार्थज्ञानवान्, स एव चेश्वरः । अत एवोदयनाचार्य कथयति-**अदृश्यदृष्टौ सर्वज्ञः**[२०] इति । महर्षिणा पतञ्जलिना योगदर्शने चेश्वरस्य सर्वज्ञत्वं प्रतिपादितम् । उक्तं च सूत्रे- **तत्र निरतिशयं सर्वज्ञबीजम् ।**[२१] अर्थात् ईश्वरे वर्तमानं निरतिशयमेव तस्य सर्वज्ञत्वस्य कारणं भवतीति तात्पर्यम् ।

## ६.४. ईश्वरस्य विभुत्वम्

सर्वमूर्तद्रव्यसंयोगित्वं परममहत्परिमाणवत्वं च विभुत्वं वर्तते । अपकृष्टपरिमाणवत्वं क्रियावत्वं वा मूर्तत्वम् । विष्लृ व्याप्तौ इति धातोः व्यापकार्थे विष्णुः इति शब्दो निष्पद्यते, स चेश्वरवाचकः । अनन्त-व्यापक-विराडित्यादयो विभुत्ववाचकाः शब्दा ईश्वरविषये सहस्रशः प्रयुक्ताः सन्ति ।

षड्दर्शनसमुच्चयग्रन्थे हरिभद्रसूरिः नैयायिकमतमुल्लेखयन् प्रारम्भ एव कथयति-

**आक्षपादमते देवः सृष्टिसंहारकृच्छिवः ।**

**विभुर्नित्यैकसर्वज्ञो नित्यबुद्धिसमाश्रयः** [२२] ॥ इति ॥

---

[१७] भारद्वाजोद्योतकरः, न्यायवार्तिकम्, पृष्ठसं. ४६४

[१८] श्वेताश्वतरोपनिषद्–६/८

[१९] भारद्वाजोद्योतकरः, न्यायवार्तिक–४/१/२१, पृष्ठसं. ४६५

[२०] आचार्य उदयनः, न्यायकुसुमाञ्जलिकारिका–३/१६

[२१] पतञ्जलिः,योगसूत्रम्–१/२५

[२२] हरिभद्रसूरिः, षड्दर्शनसमुच्चयः–१३

**नैयायिकश्चाक्षपादः** इत्युक्त्यनुसारेण उक्तश्लोके प्रयुक्त आक्षपादः शब्द अक्षपादमतालम्बि-नैयायिकार्थपरकः । सः सृष्टिसंहारकर्ता ईश्वरो विभुः, नित्यः, एकः, सर्वज्ञः, नित्यज्ञानाश्रयश्च वर्तत इत्युक्तश्लोकस्याशयः । गीतायां भगवता श्रीकृष्णेनापि स्वयमीश्वरस्य विभुत्वं प्रतिपादितं यथा- **सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति**[२३] इति ।

विषयेऽस्मिन् श्रीनिवासाचार्येण यतीन्द्रमतदीपिकायामुक्तम्- **स चेश्वरो विभुस्वरूपश्च । विभुत्वं नाम व्यापकत्वम् । तच्चेश्वरस्य त्रिधा- स्वरूपतो धर्मभूतज्ञानतो विग्रहतश्च । स चानन्त इत्युच्यते**[२४] इति । त्रिविधपरिच्छेदरहितत्वमनन्तत्वम् । त्रिविधपरिच्छेदस्तु देशतः कालतो वस्तुतश्च । कुत्रचिदवर्तमानं देशपरिच्छेदः, कदाचिदवर्तमानं कालपरिच्छेदः, कस्मिँचिदवर्तमानं वस्तुपरिच्छेदः । ईश्वरे एतत्त्रयाभावोऽस्ति, अत ईश्वरो व्यापकः । एवञ्च **सर्वं खल्विदं ब्रह्म,**[२५] **नित्यं विभुः सर्वगतम्,**[२६] **यच्च किञ्चिज्जगत्यस्मिन् दृश्यते श्रूयतेऽपि वा । अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः**[२७] ॥ इत्यादीनि अनेकानि औपनिषद्-वचनानि जगत्कर्तृकस्येश्वरस्य विभुत्वमेव प्रतिपादयन्तीति । इदमेव च न्यायदर्शनस्यापि मतम् ।

### ६.५. ईश्वरस्य निराकारत्वं सगुणत्वञ्च

विशिष्टाद्वैतिन ईश्वरस्य सगुणत्वं साकारत्वञ्च स्वीकुर्वन्ति । उक्तञ्च तत्त्वत्रयग्रन्थे श्रीमल्लोकाचार्येण **'ईश्वरोऽखिलहेयप्रत्यनीकानन्तज्ञानानन्दैकस्वरूप ज्ञानशकत्यादिकल्याणगुणविभूषितः' इति ।** अर्थात् ईश्वर असंख्य-जीवोद्धारकै असंख्य-कल्याणगुणसमूहैः युक्तो वर्तते ।

कुत्रचिदुपनिषदि ईश्वरस्य निर्गुणत्वमप्युपपादितं वर्तते । यथा श्वेताश्वतरोपनिषदि **साक्षी चेताः केवलो निर्गुणश्च इति ।** परमस्य तात्पर्यं सत्वरजतमाख्याः गुणाः, अन्ये प्राकृताः गुणाश्च न सन्तीति मन्तव्यमिति विदुषां मतम् ।

न्यायमतानुसारेण ईश्वरः द्रव्यपदार्थान्तर्गतो वर्तते । सर्वेषामपि गुणानां द्रव्याश्रितत्वं सिद्धमेव । ईश्वरस्य द्रव्यत्वात् गुणानाञ्च द्रव्याश्रितत्वनियमादीश्वरोऽपि गुणाश्रयः परं सत्वादिप्राकृतगुणानां तस्मिन्नभावो वर्तत इति ।

अद्वैतवेदान्तिन ईश्वरस्य निर्गुणत्वं निराकारत्वञ्च स्वीकुर्वन्ति । विशिष्टाद्वैतिनः तस्य सगुणत्वं साकारत्वञ्चाङ्गीकुर्वन्ति । परन्तु न्यायमते ईश्वरो निराकारः सगुणश्च वर्तते । लोके घटादिकार्यसमुदायस्य कर्तारः साकारा वर्तन्ते, परमीश्वरो निराकारः । यदि लौकिककर्तार इव साकारः स्यात्, तर्हि क्वचित् कदाचित् केनचित् कुत्रचित् कस्मिँश्चित् दृष्टः स्यात्, अदृष्टत्वात् स निराकारः ।

अन्ये दार्शनिकाः ये ईश्वरस्य सगुणत्वं स्वीकुर्वन्ति, तस्य साकारत्वञ्च स्वीकुर्वन्ति, ये तस्य निर्गुणत्वं स्वीकुर्वन्ति, ते निराकारत्वञ्च स्वीकुर्वन्ति । परन्तु न्यायमते ईश्वरस्य स्वरूपं पृथग् प्रतिभाति । नैयायिकाः तं निराकारं सगुणं च निरूपयन्ति । ईश्वरे चाष्टौ गुणाः सन्तीति नैयायिकाः । ते च यथा-

**संख्यादयः पञ्च बुद्धिरिच्छा यत्नोऽपि चेश्वरे ।**[२८]

---

[२३] श्रीमद्भगवद्गीता-१३/१३

[२४] श्रीनिवासाचार्यः, यतीन्द्रमतदीपिका, नवमो=वतारः, पृष्ठसं.२४१

[२५] छान्दोग्योपनिषद्-३/१४/१

[२६] मुण्डकोपनिषद्-१/१/६

[२७] महानारायणोपनिषद्-१३

[२८] भट्टाचार्य, विश्वनाथः,कारिकावली- ३४ कारिका।

अर्थात् ईश्वरे संख्या-परिमाण-पृथक्त्व-संयोग-विभागाः बुद्धिः ईच्छा प्रयत्नश्चेति अष्टौ गुणाः सन्ति । तत्र बुद्धिरिच्छाप्रयत्नाः विशेषगुणाः, अन्ये साधारणगुणाः ।

ननु ईश्वरो निराकारः कथम् ? श्रुतिः कथयति- **सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् । स भूमिं सर्वतस्पृत्वात्यतिष्ठद्दशाङ्गुलम् ॥**[२९] अर्थात् पुरुषः= परमपुरुषः, ईश्वरः सहस्रशिरवान् सहस्रपादवान् सहस्रनयनवान् वर्तत इति चेन्न, इदन्तु सर्वं केवलं तस्य जगत्कर्तृत्वभोक्तृत्वरक्षकत्वाद्युत्कर्षं दर्शयितुं सामर्थ्यं प्रदर्शयितुं चोक्तं वर्तते, न तु तस्य साकारत्वप्रतिपादनेऽत्र तात्पर्यम् इति ।

### ६.६. ईश्वरस्य कारुणिकत्वम्

**वेदः पौरुषेयः वाक्यत्वात्, महाभारतवत्** इत्यनुमानेन चेश्वरसिद्धिर्भवति । अत्र वेदाख्यपक्षे पौरुषेयत्वं साधितम् । पौरुषेयत्वं नाम पुरुषात्=ईश्वरादुक्तम्=उपदिष्टमिति तात्पर्यम् । य उपदिशति, स आप्तो भवति, एवं यं प्रत्युपदिशति, तत्र करुणैव प्रयोजिका । सृष्टचादौ **यो ब्रह्माणं विदधाति पूर्वं यो वै वेदाँश्च प्रहिणोति तस्मै**[३०] इत्युपनिषद्वचनेन ईश्वरः ब्रह्माणं वेदमुपदिष्टवानिति ज्ञायते । तत्र सृष्टिसञ्चालने सौकर्यार्थं वेदोपदेशे कारुणिकत्वमेव प्रयोजकम् । अत ईश्वरः सृष्टचादि-यदपि कार्यं करोति, सर्वं करुणया एव इति ।

अत्रेयं शङ्का जाता- ईश्वरः कारुण्यादेव सृष्टिं करोति, तदा सृष्टिः कथं दुःखपूर्णा भवति ? समाधानमिदं सम्भाव्यतेऽत्र- ईश्वरोऽपि सृष्टिं स्वेच्छया न करोति, जीवानां धर्माधर्मयोस्तत्र कारणत्वं भवति । अधर्मश्च दुःखावह एव । जगतः दुःखसाधनत्वेऽप्यधर्मस्य जडत्वात् ईश्वराधिष्ठित एव सः दुःखजनको भवति । इत्थं कारुणिकः सर्वज्ञश्चेश्वरः कथमेतादृशदुःखावहकार्याधिष्ठातृत्वं स्वीकारोति ? चेतनानधिष्ठितस्याधर्मस्य दुःखोत्पादने ईश्वरस्यावश्यकता का ?, एवं सत्यचेतनाधिष्ठितोऽपि परमाणुः कार्यजनकः स्यात् । इदञ्च न स्वीकर्तुं शक्यते, इत्यत्रोच्यते-

ईश्वरः सर्वसमर्थोऽस्ति, जीवापेक्षया तस्यातिशयितमहिमाशालित्वं च वर्तते, तथापि वस्तुसामर्थ्यस्यान्यथाकरणसामर्थ्यं तस्य नास्ति । अदृष्टस्य च फलमनुत्पाद्यैव नाशाभावात्,

**अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभम् ।**
**नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि ॥**[३१]

इत्यादिवचनाच्च धर्माधर्मयोः फलावश्यप्रदानानन्तरमेव विनाश्यत्वं ज्ञायते ।

कारुणिकोऽपि ईश्वरः सहकारितया धर्माधर्मौ अङ्गीकृत्य विचित्रजगतः सृष्टिं करोति । करुणया जीवानां सृष्टिं करोति, तत्र जीवात्मनामदृष्टं सहकारिकारणं भवति । यदि जीवकर्मापेक्षं विनैव ईश्वरः सृष्टिं कुर्यात्, तदा सः स्वेच्छाचारी स्यात्, जीवानां जन्ममृत्युभोगमोक्षादीनामाकस्मितत्वं च प्रसज्येत । अतः जीवानामदृष्टाधिष्ठातृत्वेऽपि ईश्वरस्य कारुणिकत्वं न हन्यते ।

### ६.७. ईश्वरज्ञानस्यापरोक्षरूपत्वम् (प्रत्यक्षत्वम्)-

वाचस्पतिमिश्रः कथयति- ईश्वरो जगद्रूपकार्यस्योपादानकारणाभिज्ञ एवास्ते । अत्राभिज्ञशब्दः प्रत्यक्षज्ञानपरकः । अत ईश्वरोऽदृश्यपरमाणुप्रत्यक्षज्ञानवान् । **अपरोक्षत्वं च ज्ञानकरणजन्यत्वरहितज्ञानवत्त्वम्** । अनुमितौ व्याप्तिज्ञानस्य करणत्वम्, उपमितौ अतिदेशवाक्यार्थस्मरणरूपसंस्कारस्य करणत्वम्, शाब्दबोधे च

---

[२९] शुक्लयजुर्वेदसंहिता-३१/१

[३०] श्वेताश्वतरोपनिषद्-६/१८

[३१] गरुडपुराणम्, सारोद्धारः-१५/५७

पदज्ञानस्य करणत्वम् । पदार्थस्मृतिः पदार्थानुभवजन्यसंस्काराज्जायते, स्मृतिश्चानुभवजन्यसंस्कारादुत्पद्यते । एवमुक्तपरोक्षज्ञानानां संस्कारजन्यत्वमुपपद्यते, परन्तु ईश्वरज्ञानस्य नित्यत्वात्तस्य संस्कारजन्यत्वं नास्ति । कालान्तरे विषयज्ञानजन्यत्वार्थमेवानित्यज्ञानात्संस्कारोऽनिवार्यः, संस्काराच्च स्मृतिः स्वीक्रियते । विषयप्रकाशात्मकं ज्ञानं यस्य नित्यमस्ति, तत्कृते विषयस्य नित्यसिद्धत्वात् संस्कारस्य स्मरणस्य चावश्यकता एव नास्ति । अत ईश्वरज्ञानमपरोक्षरूपमेव ।

**७. उपसंहारः**

एवञ्च पौरस्त्यदर्शनेषु मध्ये अन्यतमं न्यायदर्शनमीश्वराख्यं परमात्मतत्त्वं स्वीकरोति । स च ईश्वरः जगतो निमित्तकारणं भवति । कार्यरूपस्य जगतः कर्तृत्वेन स्वीकृत स एक एव, अनेकत्वे प्रमाणाभावात् । महतः प्रपञ्चस्य सर्वविषयस्य च ज्ञानाभावे जगन्निर्मातुमशक्यत्वात् स सर्वज्ञश्च सिध्यति । सर्वज्ञस्य तस्य विभुत्वं तर्केण आगमादिप्रमाणेन च स्वीकर्तव्यमेव । चैतन्यवतः परमात्मनो शरीरस्याभावात् आत्मस्वरूपस्य निराकारत्वमनुमानेन शास्त्रेण च वक्तुं शक्यते । निराकारोऽपि ईश्वरः सगुणः एव न्यायमते । ज्ञानेच्छाकृतिमत्त्वाभावे जगत्कर्तृत्वं न सम्भवतीति सः ज्ञानादिगुणवान् च भवति । करुणयैव लोके अनादिकालात् दुःखनिमग्नानां जीवात्मनामुद्दिधीर्षया सृष्टिं करोतीति वक्तुमर्हम् । सर्वमावृत्य तिष्ठतीति शास्त्रवचनात् अस्य विभूत्वाङ्गीकरणम् अनिवार्यमेव । ईश्वरस्य करुणया एव सृष्ट्यादिषु प्रवृत्तिर्भवति, अतः तस्य कारुणिकत्वमपि स्वीकर्तव्यमेव । सर्वसमर्थस्येश्वरस्य सकलपदार्थप्रत्यक्षत्वमिति तु सर्वसम्मतमेव इत्येवं बहवो विषयाः न्यायदर्शनेन ईश्वरविषये निरुपिताः सन्तीति दिक् ।

**सन्दर्भग्रन्थाः**


अन्नम्भट्टः (ई. सं २००३), *तर्कसंग्रहः* (न्यायबोधिनी-पदकृत्य-दीपिका-किरणावलीसहितः), वाराणसी : चौखम्बा विद्याभवनम्, ।

*ईशाद्यष्टोत्तरशतोपनिषदः* (ई.सं. २००३), नवदेहली : राष्ट्रियसंस्कृतसंस्थानम् ।

*गरुडपुराणम्* (सारोद्धारः) (वि.सं. २०६३), वाराणसी : बाबू माधवप्रसाद शर्मा

गोयन्दका, हरिकृष्णदास(हिन्दीअनुवादकः)(२०६०), *श्रीमद्भगवद्गीता,* (श्रीरामानुजभाष्यसहिता) गोरखपुरम् : गीताप्रेसः ।

द्विवेदी शिवप्रसादः (इ.सं. २०१५), *यतीन्द्रमतदीपिका* (हिन्दीव्याख्या), वाराणसी : चौखम्बासुरभारतीप्रकाशनम्

भट्टः, जयन्तः (वि.सं.२०३९), *न्यायमञ्जरी* (ग्रन्थिभङ्गव्याख्यायुता), वाराणसी : सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः

भट्टाचार्यः, विश्वनाथः (वि.सं.२०६३), *न्यायसिद्धान्तमुक्तावली* (किरणावलीसहिता), वाराणसी : चौखम्बा-संस्कृतसंस्थानम् ।

भारद्वाजोद्योतकरः (वि.सं. २०६४), *न्यायवार्तिकम्* (पुनर्मुद्रितम्), वाराणसी : चौखम्बासंस्कृतभवनम् ।

वात्स्यायनः (वि.सं.२०६९), *न्यायदर्शनम्* (वात्स्यायनभाष्यसहितम्), वाराणसी : चौखम्बासंस्कृतभवनम् ।

*शुक्लयजुर्वेदीय-माध्यन्दिनीय-वाजसनेयिसंहिता* (वि.सं. २०५१), मुम्बई : अङ्गिराआश्रमट्रष्ट ।

श्रीवास्तवः सुरेशचन्द्रः (ई.सं. २०१२), *पातञ्जलयोगदर्शनम्* (व्यासभाष्यम्-हिन्दीव्याख्यासहितम्), वाराणसी : चौखम्बासुरभारती-प्रकाशनम् ।

सिद्धान्तशिरोमणिः, विश्वेश्वरः(ई.सं. २००५), *हिन्दीन्यायकुसुमाञ्जलिः,* वाराणसी : चौखम्बाविद्याभवनम् ।

सिंहः, चन्द्रजः (ई.सं.२००६), *तर्कसंग्रहः* (पदकृत्यटीका, हिन्दीटीकासहितः), वाराणसी : चौखम्बा सुरभारती प्रकाशनम्, ।

सूरिः हरिभद्रः (वि.सं. २०६९), *षड्दर्शनसमुच्चयः* (संस्कृतहिन्दीव्याख्योपेतः), वाराणसी : चौखम्बाकृष्णदासअकादमी ।